# ॥ पुरुषसूक्तम् ॥

## || puruṣa sūktam ||

ॐ तच्छं॒ योरावृ॑णीमहे । गा॒तुं य॒ज्ञाय॑ । गा॒तुं य॒ज्ञप॑तये । दैवी᳚स्व॒स्तिर॑स्तु नः ।
स्व॒स्तिर्मानु॑षेभ्यः । ऊ॒र्ध्वं जि॑गातु भे॒षजम् । शं नो॑ अस्तु द्वि॒पदे᳚ । शं
चतु॑ष्पदे ।
ॐ शान्ति॒ः शान्ति॒ः शान्ति॑ः ।

om tacchaṁ yorāvṛṇīmahe। gātuṁ yajñāya। gātuṁ yajñapataye। daivīsvastirastu naḥ।
svastirmānuṣebhyaḥ। ūrdhvaṁ jigātu bheṣajam। śaṁ no astu dvipade। śaṁ catuṣpade।
om śāntiḥ śāntiḥ śāntiḥ ।

ॐ स॒हस्र॑शीर्षा॒ पुरु॑षः । स॒ह॒स्रा॒क्षः स॒हस्र॑पात् ।
स भूमि॑ं वि॒श्वतो॑ वृ॒त्वा अत्य॑तिष्ठद्दशाङ्गु॒लम् ॥
om sahasraśīrṣā puruṣaḥ । sahasrākṣaḥ sahasrapāt ।
sa bhūmiṁ viśvato vṛtvā atyatiṣṭhaddaśāṅgulam ॥

पुरुष एवेदगं सर्वम्। यद्भूतं यच्च भव्यम्।
उतामृतत्वस्येशानः। यदन्नेनातिरोहति।

puruṣa evedagṁ sarvam | yadbhūtaṁ yacca bhavyam |
utāmṛtatvasyeśānaḥ | yadannenātirohati |

एतावानस्य महिमा। अतो ज्यायागंश्च पूरुषः।
पादोऽस्य विश्वा भूतानि। त्रिपादस्यामृतं दिवि।

etāvānasya mahimā | ato jyāyāgṁśca pūruṣaḥ |
pādo'sya viśvā bhūtāni | tripādasyāmṛtaṁ divi |

त्रिपादूर्ध्व उदैत्पुरुषः। पादोऽस्येहाऽऽभवात्पुनः।
ततो विष्वङ्व्यक्रामत्। साशनानशने अभि।

tripādūrdhva udaitpuruṣaḥ | pādo'syehā''bhavātpunaḥ |
tato viṣvaṅvyakrāmat | sāśanānaśane abhi |

तस्माद्विराडजायत। विराजो अधि पूरुषः।
स जातो अत्यरिच्यत। पश्चाद्भूमिमथो पुरः।

tasmādvirāḍajāyata | virājo adhi pūruṣaḥ |
sa jāto atyaricyata | paścādbhūmimatho puraḥ |

यत्पुरुषेण हविषा । देवा यज्ञमतन्वत ।

वसन्तो अस्यासीदाज्यम् । ग्रीष्म इध्मश्शरद्धविः ।

yatpuruṣeṇa haviṣā | devā yajñamatanvata |
vasanto asyāsīdājyam | grīṣma idhmaśśaraddhaviḥ |

सप्तास्यासन्परिधयः । त्रिः सप्त समिधः कृताः ।

देवा यद्यज्ञं तन्वानाः । अबध्नन्पुरुषं पशुम् ।

saptāsyāsanparidhayaḥ | triḥ sapta samidhaḥ kṛtāḥ |
devā yadyajñaṁ tanvānāḥ | abadhnanpuruṣaṁ paśum |

तं यज्ञं बर्हिषि प्रौक्षन् । पुरुषं जातमग्रतः ।

तेन देवा अयजन्त । साध्या ऋषयश्च ये ।

taṁ yajñaṁ barhiṣi praukṣan | puruṣaṁ jātamagrataḥ |
tena devā ayajanta | sādhyā ṛṣayaśca ye |

तस्माद्यज्ञात्सर्वहुतः । संभृतं पृषदाज्यम् ।

पशूग्स्ताग्श्चक्रे वायव्यान् । आरण्यान्ग्राम्याश्च ये ।

tasmādyajñātsarvahutaḥ | sambhṛtaṁ pṛṣadājyam |
paśūgstāgścakre vāyavyān | āraṇyāngrāmyāśca ye |

तस्माद्यज्ञात्सर्वहुतः। ऋचः सामानि जज्ञिरे।

छन्दांसि जज्ञिरे तस्मात्। यजुस्तस्मादजायत।

tasmādyajñātsarvahutaḥ| ṛcaḥ sāmāni jajñire |
chandāgṁsi jajñire tasmāt | yajustasmādajāyata |

तस्मादश्वा अजायन्त। ये के चोभयादतः।

गावो ह जज्ञिरे तस्मात्। तस्माज्जाता अजावयः।

tasmādaśvā ajāyanta | ye ke cobhayādataḥ |
gāvo ha jajñire tasmāt | tasmājjātā ajāvayaḥ |

यत्पुरुषं व्यदधुः। कतिधा व्यकल्पयन्।

मुखं किमस्य कौ बाहू। कावूरू पादावुच्येते।

yatpuruṣaṁ vyadadhuḥ | katidhā vyakalpayan |
mukhaṁ kimasya kau bāhū | kāvūrū pādāvucyete |

ब्राह्मणोऽस्य मुखमासीत्। बाहू राजन्यः कृतः।

ऊरू तदस्य यद्वैश्यः। पद्भ्यां शूद्रो अजायत।

brāhmaṇo'sya mukhamāsīt | bāhū rājanyaḥ kṛtaḥ |
ūrū tadasya yadvaiśyaḥ| padbhyāgṁ śūdro ajāyata |

च॒न्द्र॒मा मन॑सो जा॒तः । चक्षो॒ः सूर्यो॑ अजायत ।

मु॒खादिन्द्र॑श्चा॒ग्निश्च॑ । प्रा॒णाद्वा॒युर॑जायत ।

ca̱ndramā̱ mana̍so jā̱taḥ | cakṣo̱ḥ sūryo̍ ajāyata |
mukhā̱dindra̍ścā̱gniśca̍ | prā̱ṇādvā̱yura̍jāyata |

नाभ्या॑ आसीद॒न्तरि॑क्षम् । शी॒र्ष्णो द्यौः सम॑वर्तत ।

प॒द्भ्यां भूमि॒र्दिश॒ः श्रोत्रा॒॑त् । तथा॑ लो॒काग्ं अ॑कल्पयन् ।

nābhya̍ āsīda̱ntari̍kṣam | śī̱rṣṇo dyauḥ sama̍vartata |
pa̱dbhyāṁ bhūmi̱rdiśa̱ḥ śrotrā̎t | tathā̍ lo̱kāgm
a̍kalpayan |

वे॒दा॒हमे॒तं पुरु॑षं म॒हान्त॒॑म् । आ॒दि॒त्यव॑र्ण॒ं तम॑सस्तुपा॒रे ।

सर्वा॑णि रू॒पाणि॑ वि॒चि॒त्य॒ धीर॑ः । नामा॑नि कृ॒त्वाऽभि॒वद॒न् यदास्तेॎ ।

vedā̱hame̱taṁ puru̍ṣaṁ ma̱hāntam̎ | ā̱di̱tyavar̍ṇaṁ̱
tama̍sastupā̱re|
sarvā̍ṇi rū̱pāṇi̍ vi̱citya̱ dhīra̍ḥ| nāmā̍ni kṛ̱tvā'bhi̱vada̱ṉ
yadāste̎|

धाता पुरस्ताद्यमुदाजहार । शक्रः प्रविद्वान्प्रदिशश्चतस्रः ।

तमेवं विद्वानमृत इह भवति । नान्यः पन्था अयनाय विद्यते ।

dhātā purastādyamudājahāra | śakraḥ pravidvānpradiśaścatasraḥ |

tamevaṁ vidvānamṛta iha bhavati | nānyaḥ panthā ayanāya vidyate |

यज्ञेन यज्ञमयजन्त देवाः । तानि धर्माणि प्रथमान्यासन् ।

ते ह नाकं महिमानः सचन्ते । यत्र पूर्वे साध्याः सन्ति देवाः ।

yajñena yajñamayajanta devāḥ | tāni dharmāṇi prathamānyāsan |

te ha nākaṁ mahimānaḥ sacante | yatra pūrve sādhyāḥ santi devāḥ |

अद्भ्यः संभूतः पृथिव्यै रसाच्च । विश्वकर्मणः समवर्तताधि ।

तस्य त्वष्टा विदधद्रूपमेति । तत्पुरुषस्य विश्वमाजानमग्रे ॥

adbhyaḥ sambhūtaḥ pṛthivyai rasācca| viśvakarmaṇaḥ samavartatādhi |

tasya tvaṣṭā vidadhadrūpameti| tatpuruṣasya viśvamājānamagre ||

वेदाहमेतं पुरुषं महान्तम्। आदित्यवर्णं तमसः परस्तात्।

तमेवं विद्वानमृत इह भवति। नान्यः पन्था विद्यतेऽयनाय॥

vedāhametaṁ puruṣaṁ mahāntam | ādityavarṇaṁ tamasaḥ parastāt|

tamevaṁ vidvānamṛta iha bhavati | nānyaḥ panthā vidyate'yanāya ||

प्रजापतिश्चरति गर्भे अन्तः। अजायमानो बहुधा विजायते।

तस्य धीराः परिजानन्ति योनिम्। मरीचीनां पदमिच्छन्ति वेधसः॥

prajāpatiścarati garbhe antaḥ| ajāyamāno bahudhā vijāyate|

tasya dhīrāḥ parijānanti yonim| marīcīnāṁ padamicchanti vedhasaḥ||

यो देवेभ्य आतपति। यो देवानां पुरोहितः।

पूर्वो यो देवेभ्यो जातः। नमो रुचाय ब्राह्मये।

yo devebhya ātapati| yo devānāṁ purohitaḥ|

pūrvo yo devebhyo jātaḥ| namo rucāya brāhmaye|

रुचं ब्राह्मं जनयन्तः। देवा अग्रे तदब्रुवन्।

यस्त्वैवं ब्राह्मणो विद्यात्। तस्य देवा असन् वशे।

rucaṁ brāhmaṁ janayantaḥ| devā agre tadabruvan|
yastvaivaṁ brāhmaṇo vidyāt| tasya devā asan vaśe|

ह्रीश्च ते लक्ष्मीश्च पत्न्यौ। अहोरात्रे पार्श्वे।

नक्षत्राणि रूपम्। अश्विनौ व्यात्तम्।

hrīśca te lakṣmīśca ca patnyau| ahorātre pārśve|
nakṣatrāṇi rūpam| aśvinau vyāttam|

इष्टं मनिषाण। अमुं मनिषाण। सर्वं मनिषाण।

iṣṭaṁ maniṣāṇa| amuṁ maniṣāṇa|
sarvaṁ maniṣāṇa|

तच्छं योरावृणीमहे। गातुं यज्ञाय। गातुं यज्ञपतये। दैवीस्वस्तिरस्तु नः।

स्वस्तिर्मानुषेभ्यः। ऊर्ध्वं जिगातु भेषजम्। शं नो अस्तु द्विपदे। शं

चतुष्पदे।

ॐ शान्तिः शान्तिः शान्तिः।

tacchaṁ yorāvṛṇīmahe। gātuṁ yajñāya। gātuṁ
yajñapataye। daivīsvastirastu naḥ।
svastirmānuṣebhyaḥ। ūrdhvaṁ jigātu bheṣajam। śaṁ no
astu dvipade। śaṁ catuṣpade।
om śāntiḥ śāntiḥ śāntiḥ ।

* * * * * * * * *